श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नारायणसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नारायणसूक्तम् ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभुम्।
विश्वतः परमं नित्यं विश्वं नारायणग्ं हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वस्यात्मेश्वरग्ं शाश्वतग्ं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।
[नारायणं महाज्ञेयं विश्वात्मानं परायणम्।]
नारायणपरं ब्रह्म तत्वं नारायणः परः।
[नारायणपरं ब्रह्म तत्त्वं नारायणः परः।]
नारायण परो ज्योतिरात्मा नारायणः परः।
[नारायणपरो ज्योतिरात्मा नारायणः परः।]
यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा॥ **1** ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।
अनन्तमव्ययं कविग्ं समुद्रेऽन्तं विश्वशम्भुवम्।
पद्मकोशप्रतीकाशग्ं हृदयं चाप्यधोमुखम्।
अधो निष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति।
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्।

सन्ततं सिराभिस्तु लम्बत्या कोशसन्निभम्।
तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम्।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः॥ 2॥

सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः।
सन्तापयति स्वं देहमापादतलमस्तकम्।
[सन्तापयति स्वं देहमापादतलमस्तकम्।]
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः।
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।
नीवारशूकवत्तन्वी पीताभास्यात्तनूपमा।
[नीवारशूकवत्तन्वी पीताभास्यात्तनूपमा।]
तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्॥ 3॥

ऋतं सत्यं परंब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥ 4॥

ओं नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्॥ 4॥

॥ इति नारायणसूक्तं समाप्तम्॥